नं० ७८४-घ

शिशुपालवधः (काव्यालंकारशास्त्रम्)

कर्त्ता म०क०माघः

नं० ७८५-घ

पत्राणि ३-६ (अपूर्णम्)

नं० ७८४-घ

शिशुपालवधः (काव्यालंकारशास्

पत्राणि ३-६ (अपूर्णम्)

कर्त्ता महाकविः माघः

माघनवसर्गाः प ३९

व्यासकाव्यावली ३

मा. १

॥६०॥ श्रीगणपतये नमः ॥ श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि वसन्ददर्शा-
वतरंतमंबराद्धिरण्यगर्भांगभुवं मुनिं हरिः १ द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं
हुताशनः गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः २ पतत्यधो धाम विसारि
सर्वतः किमेतदित्याकुलमीक्षितं जनैः २ चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृ-
तिं विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ३ नवानधोधो बृहतः पयोधरान्समू-
ढकर्पूरपरागपांडुरं क्षणं क्षणोत्क्षिप्तगजेंद्रकृत्तिना स्फुटोपमं भूतिसितेन शंभुना ४ दधानमंभोरु-
हकेसरद्युतीर्जटाः शरच्चंद्रमरीचिरोचिषं विपाकपिंगास्तुहिनस्थलीरुहो धराधरेंद्रं व्रततीततीरिव
५ पिशंगमौंजीयुजमर्जुनच्छविं वसानमेणाजिनमंजनद्युति सुवर्णसूत्राकलिताधरांबरां विडंबयंतं शिति-
वाससस्तनुं ६ विहंगराजांगरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितंतुभिः कृतोपवीतं हिमशुभ्रमुच्चकैर्घ-
नं घनांते तडितां गणैरिव ७ निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसितांगसंगिना चकासतं चारु
चमूरुचर्मणा कुथेन नागेंद्रमिवेंद्रवाहनं ८ अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलांगुष्ठनखांशुभिन्नया पु की. १

रः प्रवालैरिव पूरितार्धया विभान्तमच्छस्फटिकाक्षमालया ९ रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमंड
लैः स्वरैः ~~स्फुटानती~~ स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुः १० कुलकं निवर्त्य सोनुव्रजतः कृतान
तीनतीन्द्रियज्ञाननिधिर्नभःसदः समासदत्सादितदैत्यसंपदः पदं महेन्द्रालयचारु चक्रिणः ११ पतत्पतंगप्रतिम
स्तपोनिधिः पुरोस्य यावन्न भुवि व्यलीयत गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः १२ अथ प्रयत्नो
न्नमितानमत्फणैर्धृते कथंचित्फणिनां गणैरधः न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले १३
तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूपुजत् गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषि
णः १४ न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताविव स्वहस्तदत्ते मुनिमासने मुनिश्चिरंतनस्तावदभि
न्यवीविशत् १५ महामहानीलशिलारुचः पुरो निषेदिवान्कंसकृषः स विष्टरे श्रितोदयाद्रेरभिसायमुच्चकैरचू
चुरच्चंद्रमसोभिरामतां १६ विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः गृहीतुमर्यान्परिचर्यया मुहु
र्महानुभावा हि नितान्तमर्थिनः १७ अशेषतीर्थोपहृताः कमण्डलोर्निधाय पाणावृषिणाभ्युदीरिताः अघौघविध्वंस
विधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः १८ स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत जिगाय जंबूज

मा॰
२

नितच्छ्रियः श्रियं सुमेरुशृंगस्य तदा तदासने १९ सतत्त्वकार्त्तस्वरभास्वरांवरः कठोरताराधिपलांछनछविः विदि
द्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवांभसां निधिः २० रथांगपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजि
रे चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्त्तेरिव नक्तमंशवः २१ प्रफुल्लतापिच्छनिभैरभीशुभिः शुभैश्च सप्तछ
दपांशुपांडुभिः परस्परेण च्छुरितामलच्छवी तदैकवर्णाविव तौ बभूवतुः २२ युगांतकालप्रतिसंहृतात्मनो जगंति यस्
स्यां सविकाशमासत तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः २३ निदाघधामानमिवाधिदीधितिं मु
दा विकाशं मुनिमभ्युपेयुषी विलोचने बिभ्रदधिश्रितश्रियी स पुंडरीकाक्ष इति स्फुटोभवत् २४ सितं सितिम्ना सुतरां मुने
र्वपुर्विसारिभिः सौधमिवाथ लंभयन् द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः २५ हरत्यघं
संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां २६ जगत्यप
र्याप्तसहस्रभानुना न यन्नियंतुं समभावि भानुना प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः २७ कृतः प्रजा
क्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना सदोपयोगेपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसंपदामिव २८ को॰
विलोकनेनैव तवामुना मुने कृतः कृतार्थोस्मि निवर्हितांहसा तथापि शुश्रूषुरहं गरीयसीर्गिरोथवा श्रेयसि केन तृप्यते २९ २

गतस्य होऽस्यागमनप्रयोजनं वेदेति वक्तुं व्यवसीयते यया ततोऽतिनम्रामुदितात्मगौरवो गुरुस्तवैवागमनं प्रचष्टतां ३० इ
ति ब्रुवंतं तमुवाच सद्ब्रह्मचारीतीन वाच्यमित्थं पुरुषोत्तम त्वया त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनाम
पि ३१ उदारिरागप्रतिरोधकं जनैरमीदृशं मनुष्यतयातिदुर्गमे उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरयायसं
श्रया ३२ उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं
पुराविदः ३३ निवेशयामासिथ हेलयोद्धृतं फणाभृतां छादनमेकमोकसः जगत्त्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरा
स्तंभशिरःसु भूतले ३४ अनन्यगुर्व्यास्तव केन केवलं पुराणमूर्तेर्महिमावगम्यते मनुष्यजन्मापि सुरासुरान्गुणैर्भवा
न्भवोच्छेदकरैः करोत्यधः ३५ लघूकरिष्यन्नतिभारभंगुराममूं किल त्वं त्रिदिवादवातरः उदूढलोकत्रितयेन सांप्र
तं गुरुर्धरित्री क्रियतेतरां त्वया ३६ निजौजसोज्जासयितुं जगद्द्रुहामुपाजिहीथा न महीतले यदि समाहितैरप्य
निरूपितस्ततः पदं दृशः स्याः कथमीशमादृशां ३७ उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वंभर विश्वमीशिषे कृ
तेरवेः क्षालयितुं क्षमेत कः क्षितिपात मस्कांडमलीमसं नभः ३८ करोति कंसादिमहीभृतां वधाज्जनोमःगाणमि
वयत्तवस्तवे हरेर्हिरण्याक्षपुरः सरासुरद्विपद्विषः प्रस्तुतसातिरस्क्रिया ३९ प्रवृत्त एव स्वयमुज्झितश्रमः क्रमेण

येहं भुवनद्विषामसि नयापि वा चालयता पुनः क्षिमो मिथस्त्वदाभावमणालोलुपं मनः ४० तदिदं दुःसं
3 हिंसमुपेन्द्र यद्वचः हणं मया विश्वजनीनमुच्यते समस्तकार्येषु गतेन धुर्यतामहिद्विषस्तद्भवता निश
म्यतां ४१ अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः यमिन्द्रशब्दार्थनिषू
दने हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयतां
भयस्य सर्वोवतरस्तरस्विना मनस्सु येन द्युसदां न्यधीयत ४३ दिशामधीशांश्चतुरो यतः सुरा
नपास्यतं रागहृताः सिषेविरे अवापुरारभ्य ततश्चलाऽस्थितिं प्रवादमुच्चैरयशस्करं श्रियः ४४ पुरा
णि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कञ्चुकाः स्वरूपशोभैकफलानि नाकिनां गणै
स्तमाशंक्यत तदादि चक्रिरे ४५ स संचरिष्णुर्भुवनान्तरेषु यां यदृच्छयाशिश्रियदाश्रयः श्रियः अका
रि तस्यै मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिशे नमः ४६ सटाच्छटाभिन्नघनेन बिभ्रता नृसिं
ह सैंहीमतनुं तनुं त्वया समुग्धकान्तास्तनसंगभंगुरैरुरोविदारं प्रतिचस्करे नखैः ४७ विनोदमिच्छ को
न्नथ दर्पजन्मनो रणेन कण्ड्वास्त्रिदशैः समं पुनः सरावणो नाम निकाममीषणं बभूव रक्षः क्षतरक्षणं ३

दिवः ४८ प्रभुर्बभूषुर्भुवनत्रयस्य यः शिरोतिरागाद्दशमं चिकर्तिषुः अतर्कयद्विघ्नमिवेष्टसाहसः प्रसादमिच्छा
सदृशं पिनाकिनः ४९ समुत्क्षिपन्यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः त्रसत्तुषाराद्रिसुताससं
भ्रम स्वयंग्रहाश्लेषसुखेन निष्क्रयं ५० पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगना विगृह्य
चक्रेण मुचिद्विषा वशी य इत्थमस्वास्थ्यमहर्निशं दिवः ५१ सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः
पदक्रमं अनुद्रुतः संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रतां ५२ अशक्नुवन्सोढुमधीरलोचनः सह
स्ररश्मेरिव यस्य दर्शनं प्रविश्य हेमाद्रिगुहागृहांतरं निनाय बिभ्यद्दिवसानि कौशिकः ५३ बृहच्छिलानिष्ठु
रकंठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः जगत्त्रयोरस्रसहिस्म वैष्णवं न चक्रमस्याक्रमताधिकंधरं ५४ वि
विभिन्नशंखः कलुषीभवन्मुहुर्मदेन दंतीव मनुष्यधर्मणः निरस्तगांभीर्यमपास्तपुष्पकः प्रकंपयामास न मान
सं न सः ५५ रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुंकारपराङ्मुखीकृताः प्रहर्तुरेवोरगराजरज्जवो जवेन कं
ठं सभयाः प्रपेदिरे ५६ परेतभर्तुर्महिषोमुना धनुर्विधातुमुत्खातविषाणमंडलः हृतेपि भारे महतस्त्रपा
भरादुवाह दुःखेन भृशानतं शिरः ५७ स्पृशन्सशंकं समये शुचावपि स्थितः कराग्रैरसमग्रपातिभिः अघ

मा० ४ घर्मे घर्मोदकविंदुमौक्तिकैरलंचकारास्य वधूरहस्करः ५८ कलासमग्रेण गृहानमुंचता मनस्विनीरुत्कयि
तुं पटीयसा विलासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेंदुना ५९ विदग्धलीलोचितदंतप
त्रिकाविधित्सया नूनमनेन मानिना न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति ६० निशां
तनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः प्रियेण तस्यानपराधबाधिताः प्रकंपेनानुचकंपिरे सु
राः ६१ तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना महसा महीयसे बभार बाष्पैर्द्विगुणीकृतं तनुस्तनून
पाद्धूमवितानमाधिजैः ६२ तदीयमातंगघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः गृहीतदिक्कैर
पुनर्निवर्तिभिश्चिरस्य याथार्थ्यमलंभि दिग्गजैः ६३ परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्म
गामिभिः तमिद्धमाराधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजंगता ६४ तपेन वर्षाः शरदा हिमागमो वसंत
लक्ष्म्या शिशिरः समेत्य च प्रसूनकॢप्तिं दधतः सदर्तवः पुरेस्य वास्तव्यकुटुंबितां ययुः ६५ अभीक्ष्णमुष्णै
रपि तस्य सोष्मणः सुरेंद्रबंदीश्वसितानिलैर्यथा सचंदनांभःकणकोमलैस्तथा वपुर्जलार्द्रापवनै का
र्न निर्ववौ ६६ अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमंतमात्मनः मुमोच ८

जानन्नपि जामकानयः सदाभिमाने कथना हि मानिन ६७ स्मरत्सदा दाशरथिर्भवन्भवानमुं वनांताद्वनितापहारि
णं पयोधिमाविद्धचलज्जलाविलं विलंघ्य लंकां निकषा हनिष्यति ६८ अथोपपत्तिं छलनापरोपरामवाप्य शैलूष
इवैष भूमिकां तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते संप्रति सोप्यसः परैः ६९ स बाल आसीद्वपुषा चतुर्भुजो मुखेन
पूर्णेंदुनिभस्त्रिलोचनः युवा कराक्रांतमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः ७० स्वयं विधाता सुरदैत्यरक्षसामनु
ग्रहापग्रहयोर्यदृच्छया दशाननादीनभिराद्धदेवतावितीर्णवीर्यातिशयान्हसत्यसौ ७१ बलावलेपादधुनापि पूर्व
वत्प्रबाध्यते तेन जगज्जिगीषुणा सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवांतरेष्वपि ७२ तदेनमुल्लंघित
शासनं विधेर्विधेहि कीनाशनिकेतनातिथिं शुभेतराचारविपक्क्रिमापदो निपादनीया हि सतामसाधवः ७३ हृदय
मरिवधोदयादुपोढद्रढिं दधातु पुरः पुरंदरस्य घनपुलकपुलोमजाकुचाग्रद्रुतपरिरंभनिपीडनक्षमत्वं ७४
ओमित्युक्तवतोथ शार्ङ्गिण इति व्याहृत्य वाचं नभस्तस्मिन्नुत्पतिते पुरः सुरमुनौ इंदोः श्रियं बिभ्रति शत्रूणामनिशं विना
शपिशुनः क्रुद्धस्य चैद्यं प्रति व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदं ७५ इति श्री शिशुपालवधे महाकाव्ये माघ
कृतौ नारदाभिगमनो नाम प्रथमः सर्गः समाप्तः ॥ १ ॥ यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरं अभिचैद्यं प्रतिष्ठासुरासीत्

५

कार्यद्वयाकुलः १ गुरुकाव्यानुगां बिभ्रच्चांद्रीमभिनभिनभः श्रियं सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः २
जाज्वल्यमाना जगतः शांतये समुपेयुषी व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी ३ रत्नस्तंभेषु संक्रांतप्र
तिमास्ते चकाशिरे विनाकिनोपि परितः पौरुषेयवृता इव ४ अध्यासामासुरुत्तुंगहेमपीठानि यान्यमी तैरूहे केसरि
क्रांतत्रिकूटशिखरोपमा ५ गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोः हरिर्विप्रतिषेधं तमाचचक्षे विचक्षणः ६ द्योति
तांतःसभैः कुंदकुड्मलाग्रदतः स्मितैः स्नपितेवाभवत्तस्य शुद्धवर्णसरस्वती ७ भवद्गिरामवसरप्रदानाय वचांसि नः पूर्व
रंगः प्रसंगाय नाटकीयस्य वस्तुनः ८ करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशां विनाप्यस्मदलंभूष्णुरिज्यायै तपसः
सुतः ९ उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता समौ हि शिष्टैराम्नातौ वर्त्स्यंतावामयः स च १० न दूये सात्व
ती सूनुः यन्मह्यमपराध्यति यत्तु दंदह्यते लोकमतो दुःखाकरोति मां ११ मम तावन्मतमिदः श्रूयतामंग वामपि
ज्ञातसारेपि खल्वेकः संदिग्धे कार्यवस्तुनि १२ यावदर्थपदां वाचमेवमादाय माधवः विरराम महीयांसः प्रकृ
त्यामितभाषिणः १३ ततः सपत्नापनयस्मरणानुशयस्फुरा ओष्ठेन रामो रामोष्ठबिंबचुंबनचुंचुना १४ विव
क्षितामर्थविदस्तत्क्षणप्रतिसंहृतां प्रापयन्पवनव्याधेर्गिरमुत्तरपक्षतां १५ घूर्णयन्मदिरास्वादमदपाटलितद्युती ५

रेवतीदशनोच्छिष्टपरिपूतपुटे दृशौ ॥ १६ ॥ आश्लेषलोलपीवरवधूस्तनकार्कश्यसाक्षिणीं म्लापयन्नतिमानो

ष्णैर्वनमालां मुखानिलैः ॥ १७ ॥ दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः द्विषद्द्वेषोपरक्तांगसंगिनीः स्वेदवि

प्रुषः ॥ १८ ॥ श्रोत्रलसत्कुंडलशोणपद्मरागदलत्विषा कृष्णोत्तरासंगरुचं विदधच्चूतपल्लवीं ॥ १९ ॥ ककुद्मिकन्या

वक्त्रांतर्वासलब्धाधिवासया मुखामोदं मदिरया कृतानुव्याधमुद्वमन् ॥ २० ॥ जगाद वदनच्छद्मपद्मपर्यंतपा

तिनः नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः ॥ २१ ॥ त्रिभिः कुलकं ॥ यद्वासुदेवेनादीनमनादीनवमीरितं

वचसस्तस्य सपदि क्रिया केवलमुत्तरं ॥ २२ ॥ नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते इंधनौघधगप्यग्नि

स्त्विषा नात्येति पूषणं ॥ २३ ॥ विरोधिवचसो मूकान्वागीशानपि कुर्वते जडानप्यनुलोमार्थप्रवाचः कृतिनो

गिरः ॥ २४ ॥ संक्षिप्तस्याप्यतोस्यैव वाक्यस्यार्थगरीयसः सुविस्तरतरा वाचो भाष्यभूता भवंतु मे ॥ २५ ॥ सर्वका

र्यशरीरेषु मुक्त्वांगस्कंधपंचकं सौगतानामिवात्मान्यो नास्ति मंत्रो महीभृतो ॥ २६ ॥ षड्गुणाः शक्तयस्तिस्रः

सिद्धयश्चोदयास्त्रयः ग्रंथानधीत्य व्याकर्तुमिति दुर्मेधसोप्यलं ॥ २७ ॥ अनिर्लोडितकार्यस्य वाग्जालं वाग्मि

६ नोदृष्या निमित्तादपराद्धबोधाद्धनुष्मतस्येव वलितानि ते २८ मंत्रो योध इवाधीरः सर्वांगैः संवृतैरपि चिरं न सहते
स्थातुं परेभ्यो भेदशंकया २९ आत्मोदयः परज्यानि द्वयं नीतिरितीयती तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्र
तायते ३० तृप्तियोगः परेणापि न महिम्नां महात्मनां पूर्णश्चंद्रोदयाकांक्षी दृष्टांतोत्र महार्णवः ३१ संपदा सु
स्थितंमन्यो भवति स्वल्पयापि यः कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य तां ३२ समूलघातमघ्नंतः परान्नोद्यंति
मानिनः प्रध्वंसितांधतमसस्तत्रोदाहरणं रविः ३३ विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा अनीत्वा पंकतां धूलि
मुदकं नावतिष्ठते ३४ ध्रियते यावदेकोपि रिपुस्तावत्कुतः सुखं पुरः क्लिश्नाति सोमं हि सैंहिकेयोसुरद्रुहां ३
५ सखी गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः स्यातामित्रौ मित्रे च सहजप्राकृतावपि उपकर्त्रारिणा संधिर्न
मित्रेणापकारिणा उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ३७ त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरेः
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ३८ त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमां प्रोषितार्यमणं मेरो
रंधकारस्तटीमिव ३९ आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् कथापि खलु पापानामलमश्रेयसे यतः ४० ६

विधायवैरंसामर्षेनरोरौयउदासते प्रक्षिप्योदर्चिषंकक्षेशेरतेतेभिमारुतं ४२ मनागनभ्यावृत्त्यावाकामंक्षा
म्यतुयःक्षमी क्रियासमभिहारेणविराध्यंतंक्षमेतकः ४३ अन्यदाभूषणंपुंसःक्षमालज्जेवयोषितः पराक्र
मःपरिभवेवैयात्यंसुरतेष्विव ४४ माजीवन्यःपरावज्ञादुःखदग्धोपिजीवति तस्याजननिरेवास्तुजननीक्ले
शकारिणः ४५ पादाहतंयदुत्थायमूर्द्धानमधिरोहति स्वस्थादेवापमानेनदेहिनस्तद्वरंरजः ४६ असंपादय
तःकिंचिदर्थंजातिक्रियागुणैः यदृच्छाशब्दवत्पुंसःसंज्ञायैजन्मकेवलं ४७ तुंगत्वमितरानाद्रौनेदंसिंधावगा
धता अलंघनीयताहेतुरुभयंतन्मनस्विनि ४८ तुल्येपराधेस्वर्भानुर्भानुमंतंचिरेणयत् हिमांशुमाशुग्रस
तेतन्म्रदिम्नःस्फुटंफलं ४९ स्वयंप्रणमतेल्पेपिपरवायावुपेयुषि निदर्शनमसाराणांलघुर्बहुतृणंनरः ५०
तेजस्विमध्येतेजस्वीदवीयानपिगण्यते पंचमःपंचतपसस्तपनोजातवेदसां ५१ अकृत्वाहेलयापादमुच्चैर्मूर्द्ध
सुविद्विषां कथंकारमनालंबाकीर्त्तिर्द्यामधिरोहति ५२ अंकाधिरोपितमृगश्चंद्रमामृगलांछनः केसरीनिष्ठु
रक्षिप्तमृगयूथोमृगाधिपः ५३ चतुर्थोपायसाध्येहि [illegible]सांत्वमपक्रिया स्वेद्यमामज्वरंप्राज्ञःकों
भसापरिषिंचति ५४ सामवादाःसकोपस्यतस्यप्रत्युतदीपका प्रतप्तस्येवसहसासर्पिषस्तोयबिंदवः ५५ गुण

७ नामायया तथ्या दर्पं विद्रावयंतिते अमात्यविं जनौकराज्ञां दृष्याल्लेश तु संस्थिताः ५६ स्वशक्त्युपचये केचित्परस्य
व्यसनेपरे यानमाहुस्तदासीनत्वामुत्थापयति किं ५७ लिलंघयिषतो लोकानलंघ्यानलघीयसः यादो
वांभोनिधीन्रुंदे वेलेव भवतः क्षमा ५८ विजयस्त्वयि सेनायाः साक्षिमात्रेपदिश्यतां फलभाजि समीक्ष्योक्ते
बुद्धेर्भोग इवात्मनि ५९ हतेहिडंबरिपुणा राज्ञो द्वैमातुरेयुधि चिरस्य मित्रव्यसनी सुदमो दमघोषजः
६० नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः ६१ अन्यदुच्छृंखलं
सत्वमन्यच्छास्त्रनियंत्रितं समानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ६२ इंद्रप्रस्थगमस्तावत्कारि मा संतु
चेदयः आस्माकदंतिसांनिध्याद्वामनीभूतभूरुहः ६३ निरुद्धवीवधासारप्रसारा गा इव व्रजं उपरुंधंतु दाशा-
र्हाः पुरीं माहिष्मतीं द्विषः ६४ यजतां पांडवः स्वर्गमवत्विंद्रस्तपत्विनः वयं हनाम द्विषतः सर्वः स्वार्थं स-
मीहते ६५ प्राप्यतां विद्युतः संपत्संपर्कोदर्के रोचिषां शास्त्रैर्द्विवच्छिरच्छेदशेषच्छन्नच्छोणितोक्षितैः ६६ इति सं-
रंभिणो वाणीर्बलस्यालेख्यदेवताः सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ६७ निशम्यताः शेषगवीरभि-
धातुमधोक्षजः शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ६८ भारतीमाहितभरामथानुद्धतमुद्धवः तथ्यामु ७

तस्यानुजन्मजगादाग्रेणदाग्रजं ७० तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवं तत्प्रयोजककर्तृत्वमुपै
ति मम जल्पतः ७१ वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ७२ बह्व
पि स्वेच्छया कामं प्रकीर्णमभिधीयते अनुज्झितार्थसंबंधः प्रबंधो दुरुदाहरः ७३ म्रदीयसीमपि घनामनल्प
गुणकल्पितं प्रसारयंति कुशलाश्चित्रां वाचं पटीमिव ७४ विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः हेतुः प
रिचयस्थैर्ये वक्तुर्गुणनिकैव सा ७५ प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि तौ हि मूलमुदेष्यंतीं जिगीषो
रात्मसंपदः ७६ सोपधानां धियं धीराः स्थेयसीं खट्वयंति ये तत्रानिशं निषण्णास्ते जानते जातु न श्रमं ७७ स्पृशं
ति शरवत्तीक्ष्णाः स्तोकमंतर्विशंति च बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत् ७८ आरंभंतेल्पमेवाज्ञाः का
मं व्यग्रा भवंति च महारंभाः कृतधियस्तिष्ठंति च निराकुलाः ७९ उपायमास्थितस्यापि नश्यंत्यर्थाः प्रमाद्यतः हं
ति नोपशयस्थोपि शयालुर्मृगयुर्मृगान् ८० उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि जिगीषुरेको दिनकृदादि
त्येष्विव कल्पते ८१ तत्रावापविदा योगैर्मंडलान्यधितिष्ठता सुनिग्रहा नरेंद्रेण फणींद्रा इव शत्रवः ८२ कर

८ प्रज्ञेयाम्युत्तुङ्गः प्रभुशक्तिं प्रथीयसीं प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकं
चुकः चारेक्षणो दूतमुखः पुरुषः कोपि पार्थिवः ८४ तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः नैकमोजः प्रसा
दो वा रसभावविदः कवेः ८५ कृतापराधोपि परैरनाविःकृतविक्रियः असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा
८६ मृदुव्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ८७ नालम्बते दैष्टि
कतां न निषीदति पौरुषे शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ८८ स्थायिनोर्थे प्रवर्त्तन्ते भावाः संचारिणो
यथा रसस्यैकस्य भूयांसः तथा नेतुर्महीभुजः ८९ अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः ॥ विजिगीषोर्नृ
पतयः प्रयान्ति परिवारतां ९० अप्यनारभमाणस्य विभोरुत्पादिताः परैः व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः
९१ बाढमेवमुपयुञ्जीत तपस्त्वयेहं रसायनं भवेत्तस्येव मङ्गानि स्थास्नूनि बलवन्ति च ९२ स्थाने शमवतां शक्त्या
व्यायामे वृद्धिरङ्गिनां अयथाबलमारम्भो निदानं क्षयसंपदः ९३ तदीशितारं चेदीनां भवांस्तमवमंस्त मा नि
हन्त्यरीनेकपदे य उदात्तः स्वरानिव ९४ मा वेदि यदसावेको जेतव्यश्चेदिराडिति राजयक्ष्मेव रोगाणां समू ८
हः यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः एकार्थतन्तुप्रोतायां नायको नायकायते ९६ ॥ ८६

हृ:स महीभुजा ९६ संपादितफलस्तेन सपक्षः परभेदतः कार्मुकेणेव गुणिना बाणः संधानमेष्यति ९७ येचान्ये का
लयवनशाल्वरुक्मिद्रुमादयः तमःस्वभावास्तेप्येनं प्रदोषमनुयायिनः ९८ उपजापः कृतस्तेन तानाकोपवतस्त्वयि
आशुदीपयितात्योपि साग्नीनेधानिवानिलः ९९ बृहत्सहायः कार्यांतं क्षोदीयानपि गच्छति संभूयांभोधिम
स्येति महानद्यानगापगा १०० तस्य मित्राण्यमित्रास्ते ये चये चोभये नृपाः अभियुक्तं त्वयैनं ते गंतारस्त्वा
मतःपरे १०१ मखविघ्नाय सकलामित्युत्थाप्य राजकं हंतजातमजातारेः प्रथमेन त्वयारिणा १०२ संभाव्यत्वा
मतिभरःक्षमस्कंधसुबांधवं १०३ सहायमध्वरधुरं धर्मराजो विवक्षते १०४ महात्मनोनुगृह्णंति भजमाना
रिपूनपि सपत्नीः प्रापयंत्यब्धिं सिंधवो नगनिम्नगाः १०४ चिरादपि बलात्कारो बलिनः सिद्धयेरिषु छंदानुवृ
त्तिदुःसाध्यासुहृदो विमनीकृताः १०५ मन्यसे रिपुवधः श्रेयान्प्रीतये नाकिनामपि पुरोडासभुजामिष्टमिष्टिक
र्तुमलंतरं १०६ अमृतेनामयत्संतोमत्रजिह्वेषुजिह्वति शोभैव मंदिरक्षुब्धक्षोभिताम्भोधिवर्णना १०७ सहि
व्यधितमागांसि सूनोस्तस्यति यत्त्वया प्रतीक्ष्यं तत्प्रतीक्ष्यायैपित्र्यपक्षेश्वनिश्रुते १०८ तीक्ष्णानारुंतुदाबुद्धिः

९ कर्मयोगेन प्रतापवता नोपतापि मनः सोमवद्वागेकावाग्मिनः सतः १०९ स्वयं कृतप्रसादस्य तस्याह्नो भानुमानि
व समया विधिमप्राप्य नोत्तापायालमवामवि ११० कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदं विदांकुर्वन्तु मह
तस्तलं विद्विषदम्भसः १११ अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबंधनं शब्दविद्येव नो भाति राजनीतिरपस्पशा ११
२ अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ११३ उपेयिवांसि कर्तारः
पुरीमाजातशात्रवीं राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ११४ सविशेषं सुते पाण्डोर्भक्तिं त्वयि वितन्वति
वैरायितारस्तस्य त्वय्येव मत्सरिणः परे ११५ यदहास्त्वद्विदो विपक्षमध्ये सह संहत्य भुजेऽपि भूभुजः स्फुटं वलि
पुष्टकुलादिवान्यपुष्टैः पृथगस्मादचिरेण भावितानैः ११६ सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरि
ग्रहः तव दुरासदवीर्यविभावसो शलभ[illegible]नामलभतामसुहृद्गणः ११७ इति विशकलितार्थामौद्धवीं वाचमे
नामनुगतनयमार्गामर्गलां दुर्नयस्य जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरः स्थलनियतनिषण्णश्रीश्च्युतो
च्युतवान्तः ११८ इति श्रीशिशुपालवधे महाकाव्ये माघकृतौ श्र्यंके विके नीतिवर्णनो नाम द्वितीयः सर्गः ॥ २ ॥ ९

कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः अथैतदुत्ताभिनिवेशशोभो हरिर्ददर्शक्षिवस्य म
ध्यगतस्थे १ जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः यतो गुहस्तार्कवेणैव चारु तत्र
स्मातपत्रे विभरो बभूव २ मृणालसूत्रामलमंतरेण स्थितश्चलितामरयोर्द्वयं सः मेजे मितः पातुकस्ति
दुर्स्तं धोरभूतसवर्णिरूचमंबुराशे ३ चित्राभिरस्योपरि मौलमाजो भाभिर्मणीनाममनणीयसीभिः अने
कधातुघुसितारमराशेर्गोवर्द्धनस्याकृतिरन्वकारि ४ तस्योल्लसत्कांचनकुंडलाग्रप्रत्युप्तगारुत्मतर
त्नभासा अवाप्य बाल्योचितनीलकंठपिच्छावचूलाकलनामिवोरः ५ तमंगदे मंदरकूटकोटिव्याघट्ट
नोत्तेजनया मणीनां वंहीयसा दीप्तिवितानकेन चकासयामासतुरुल्लसंती ६ निसर्गरक्तैर्वनकताम्रा
श्मरश्मिसुरितैनखाग्रैः उद्योतनतानापि सुरारि हंतो विद्धो भुजौ स्कंद्नपितैरिवासौ ७ उभौ यदि व्योम्नि पृथग्व्यवाहा
वाकाशगंगापयसः पतेतां तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ८ तेनांभसां सारमयः
पयोधेर्दध्रे मणिर्दीधितिदीपिताशः अंतर्वसन्नविगतस्तदंगे साक्षाददिवालक्ष्मितयत्र लोकः ९ मु

१० ङ्कामयंसारसनावलेविभाति स्मदामप्रपदीनमस्य अंगुष्ठनिष्ठ्यूतमिवोर्द्धमुच्चैः स्त्रोतःससंततधारमंभः
१० सइंद्रनीलस्थलनीलमूर्त्तीरराजकर्हरपिशंगवासा विस्तत्वरैरंवुरुणांरजोभिर्यमस्वसूक्ष्मिव
स्त्वोदवाह ११ प्रसाधितस्याघमधुद्विषोभूदन्येवलक्ष्मीरितियुक्तमेतत् वपुष्पशेषेखिललोककां
तासानन्यकाम्या ह्युरसीतराहु १२ कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य आनंदि
ताशेषजना बभूव सर्वांगसंगिन्यपरैवलक्ष्मीः १३ दैत्याधिपश्रामुखोन्वखानामुपेयुषाभूषणतां स्तनेन
प्रकाशकार्कश्यगुणो दधानाः स्तनोन्नतरुपपरिबभ्रुरेनं १४ आकर्षते वोर्द्धमति कृशीयान्नम्रुन्नतत्वाकु
चमंडलेननतामध्यो तिगुरुत्वभाजा नितान्तमाक्रान्तइवांगनानां १५ यां यां प्रियः प्रैक्षत कातरांक्षी सा सा ह्रिया
नम्रमुखी बभूव निःशंकमन्याः सममाहितेर्ष्याः सत्रातरैजघुरमुं कटाक्षैः १६ तस्यातसी सूनसमानभासो भ्रा
म्यन्मयूखावलिमंडलेन चक्रेणरेजे यमुनाजलौघः स्फुरन्महावर्तइवैकबाहुः १७ विरोधिनां विग्रहभेददक्षाम्
र्त्तेवशक्तिः क्वचिदस्खलन्ती नित्यं हरेः संनिहितानिकामं कौमोदकी मोदयति स्म चेतः १८ नकेव [illegible] स्वतया
मुरारेरनन्यसाधारणतां दधानः अस्पर्धमुद्वेजयिता परेषां नाम्नापितस्यैवसनंदकोभूत् १९ ननीतमन्येननतिं १०

कदाचित्कर्णांतिकमात्तगुणं क्रियासु विधेयमस्याभवकस्य शार्ङ्गं धनुर्मित्रमिवद्वितीय २० यस्यरुक्मेषु बुदना
दधीरंहसा णीवाम्बली चरैकहंसो मंदानिलास्फरकृतेदधानो निध्यानमभ्रूद्यतपोवजन्यः २१ यराजसेपादका
मिष्टसिद्धेः सर्वासुदिक्षुप्रतिबिद्धमार्गं महारथः पुष्करपंरथांगी द्विश्रेद्विपानाथइवाधिरूढः २२ ध्वजाग्र
धामाददृशे यशोरेः संक्रांतमूर्त्तिर्मणिमेदनीषु फणावतस्त्रासयितुं रसायास्तलेविवद्वन्निवपन्नगारिः २३
यियासतस्तस्य महीधुरंधरमिदापटीयाम्नदहस्रणाद जलोत्तराणीवमहार्णवौघः प्रसह्यांतराण्यंतरयांचका
र २४ यतः समस्तां जगतां जगाम धत्तीधरित्र्या फणितानतोधः महाभराभुग्नशिरःसहस्रसानायकस्य भु
जेशसस्त्रे २५ अयोचकेस्तोरणसंगमंग भयावनश्रीकृतकेतनानिं क्रियाफलानीवसुनीति भाजो सेन्यानि
सामान्वयमन्वयुस्ते २६ श्यामारुणैर्वारणदानतोयैरालोडिताः कांचनभूपरागाः अनेमिमग्नेः क्षितिकेगप
तेः क्षोदद्युतमस्नुवृदिरे रथोघैः २७ नलंघयामास महाजनानां शिरांसि नैवोद्धतिमाजगाम अवेष्टताष्टा
पदभूमिरेणुः खुराहतो यत्र सहर्षं शंगरिम्णाः २८ निरुद्धमानायद्रुमिः कथंचिन्मुहुर्यदु[illegible] द्विषिपुरग्रपादो धू
दंगुरून्मार्गरुधः करीन्द्रानुल्लंघ्य गंतुं तुरगास्तदीयुः २९ अवेक्षितानायतवल्गमग्रे तुरंगमैर्यत्ननिरुद्धवा

हैः प्रक्रीडितान्नरेणुभिरेसतूर्णं निन्युर्जनन्यः प्रापुकान्द्धिमध्यः २० द्विरदस्य मार्गः प्रतिरथ्य माप्य मुरारिमारादु
१२ नघंजनौघाः अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति २१ उपेयुषो वर्त्मनिरंतराभिरसौ निरु
ध्यासमनीकिनीभिः रथस्यतस्यां पुरिदत्तचक्षुर्विद्वानविदामासधनैर्नयानं २२ मध्ये समुद्रं ककुभः पिशं
गीः याकुर्वती काञ्चनवप्रभासा तुरंगकान्तामुखहव्यवाह ज्वालेव भित्वा जलमुल्ललास २३ कृतास्पदा
भूमिभृतो सहस्रैरुदन्वदंभः परिवीतमूर्तिः अनिर्विदायादि दधेविधात्रा पृथ्वी पृथिव्याः प्रतियातनेव २
४ त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसरस्य सीमा अदृश्यतादर्शितलामलेषुच्छायेव यास्वर्ज
लधेर्जलेषु २५ रथांगभर्त्रेभिनवं वराय यस्याः पितेव प्रतिपादितायाः प्रेम्णोपकंठं मुहुरंकभाजो रत्ना
वलीरंबुधिराबबंधे २६ यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छंखकुलाकुलेन वप्रेणपर्यंतचरोडु
चक्रः सुमेरुर्वप्रेन्वहमन्वकारि २७ वलिस्फघेरगृहतानि यत्र भानाभातैरंबुभिरंबुराशिः लोलैरलो
लद्युतिभाञ्जिमुक्तारत्नानि रत्नाकरतामवाप २८ प्रेमः क्षमुतः कोमलरत्नराशीन्यपांनिधिः फेनपिन
द्धभासः यत्रातपे दातु दातुमिवोपलं विस्तारयामास तरंगहस्तैः २९ यच्छालमुच्चैगतयाविजेतुं दूरा १९

दुदस्थीयत सागरस्य महोर्मिभिर्व्याहतवीचितार्थैः श्रीउदिवाभासगतैर्विलल्पे ४० कुतूहलेनेव जवादु
पेत्य प्राकारमित्या सहसानि विद्धः रसन्नरोदीर्घश्यामेवुपर्वद्याजेन यस्या बहिरम्बुवाहः ४१ यदङ्गना
रूपसरूपतायाः किंचिद्गुणं भेदकमिच्छतीभिः आराधितोद्धा मनुरप्सरोभिश्चक्रे प्रजाः स्वाः सनिमेषचि
ह्नाः ४२ स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फाटिकसौधपंक्तीः आरुह्य नार्यः क्षणदासु यस्यां
नभोगता देव्य इव व्यराजन् ४३ कान्तेन्दुकान्तोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यत्र उच्चैरधःपातिपयो
मुचोपि समूहमूहुः पयसो प्रणाल्यः ४४ तोक्रिया यत्र निशम्यदीयान्नृजालागताभ्यो धिगृहं न हिरण्यः वि
मु विडाले क्षणभीवण्णभ्यो विदूर्यकुब्ज्येषु शशिद्युतिभ्यः ४५ यस्यामतिनिर्मलतया गृहेषु विधातुमा
लेख्यमशक्नुवंतः चक्रुर्युवानः प्रतिबिंबिताङ्गाः सजीवचित्राद्भुतरत्नभित्तीः ४६ सावर्ण्यभाजः प्रतिमा
गतायाः लक्ष्यैः स्मरापाण्डुतया तरुण्याः यस्यां कपोलैः कलधौतधामस्तंभेषु भेजे मणिदर्पणश्रीः ४७
श्यामाङ्गनीलोत्पलनिर्मितानां लिपेषु भासाम्रहलीनां यस्यामलिंदेषु न चक्रुरेव मुग्धाङ्गना गोमयगोमु
खानि ४८ गोपानसीषु क्षणमासितानामालेविभिङ्गंद्रकिलोककल्लापैः हरिन्मणिस्यामतृणाभि

रोमैः स्फटिकाश्मनीलैरिव यत्र रेजुः ४९ हेमतुलैरप्यतुलैर्वितानमालावबद्धैरपि चैर्वितानैः रेजे
विमानैश्चित्रैरपि यास्त चित्रैर्गृहैर्विशालैरपि भूरिशालैः ५० क्षितिप्रतिष्ठोऽपि मुखारविन्दैर्वधूजनश्चं
द्रमधश्चकार अतीतनिःसंख्यपथानि यत्र प्रसादशृंगाणि सुधाधरोहन् ५१ रम्याः इति शाश्वतीः
पताकाः रागं विविक्ताः इति वर्द्धयंतीः यस्यामसेवंत नमद्वलीकाः समं वधूभिर्वलभीर्युवानः ५२
सुगंधितामप्रतियत्नपूर्वां बिभ्रंति यत्र प्रमदाय पुंसां मधूनि वक्त्राणि च कामिनीनामामोदकर्मव्यति
हारमीयुः ५३ रत्नांतरे यत्र गृहांतरेषु वितर्द्दिनिर्यूहविटंकनीडः रुतानि शृण्वन्वयसां गणोऽन्तेवा
सित्वमाप स्फुटमंगनानां ५४ छन्नेष्वपि स्पष्टतरेषु यत्र स्वच्छानि नारीकुचमंडलेषु आकाशसाम्यं
दधुरंबराणि न नामतः केवलमर्थतोऽपि ५५ चित्रैः स्थिताः कृत्रिमपत्रिपंक्तेः कपोतपालीषु निकेतनानां
मार्जारमप्यानतनिश्चलांगं यस्यां जनः कृत्रिममेव मेने ५६ यस्यामजिह्मा महतीमपंकाः सीमा
नमत्यायतयोत्सजंतो जनैरजातस्खलनैर्न जातु द्वयेऽप्यमुच्यंत विनीतमार्गाः ५७ परस्परस्पर्द्धिपरा
र्ध्यरूपाः पौरस्त्रियो यत्र विधाय वेधाः श्रीनिर्मितप्राप्तघुणक्षतैकःवर्णोपमावाच्यमलं ममार्ज ५८ १२

तुल्यं यदेभिः करणैर्नदृष्टं ताफलेति कल्पोपपदास्तदेव ऽप्यधूधुवस्तामभवज्जनस्य याः संपदस्तामनसोऽप्यभूमि
मिः ५९ कलादधानः सकलाः स्वभाभिरुद्भासयन्सौधसिताभिराशाः यो रेवतीयानिरियेव हातुं नरोहिणी
यो न च रोहिणीशः ६० बालेन्दुवक्त्राप्यहतप्रभुशक्तेराससत्तिमासाद्य जनार्दनस्य शरीरिणा जैत्रशरेण यत्
त्र निःशंकमूषे मकरध्वजेन ६१ निषेव्यमानोऽनिशिवैमरुद्भिरध्यास्यमानो हरिणा चिराय उद्भासिरा
त्नो कुरुधाम्नि सिंधावाहास्तमेरावेवमरावती यो ६२ स्निग्धां जनस्य मरुद्भिः सुवृत्तो वध्वाऽऽद्वाध्वंसितवलि
को तैः विशेषको वा विशदो ऽपयस्याः श्रियं त्रिलोकी तिलकः स एव ६३ तामीदृसमाणः सपुरं पुरस्तात्प्रापत्क
तोलीमतुलप्रतापः वज्रप्रभोद्भासिसुरायुधश्रीर्या देवसेनेव परैरलंघ्या ६४ प्रजाऽद्वांगो दरविंदनाभेश्शंभो
र्जैत्राजूरत्नराद्दिवापः मुखादिवास्पश्रुतयो विधातुः पुरान्निरीयुर्मधुभिन्ध्वजिन्यः ६५ क्लिष्यद्भिरन्योन्या
मुखाग्रसंगस्खलनद्वलीनो हरिभिर्विलोलैः परस्परोत्पीडितजानुभागाः दुःखेन निष्चक्रमुरश्ववाराः ६६
निरंतराले पि विमुच्यमाने दूरं पथि प्राणभृतां गणेन तेजोमहद्भिस्तमसेवदीपैर्द्विपैरसंवादमयां बभूवे ६७
शनैरनीयंतरयात्पतंतो रथाः क्षितिं हस्तिनखादखेदैः सयत्नसूता यतरश्मिभुग्नाग्रीवाग्रसंसक्तयुगैस्तुरंगैः ६८

१२ वलोर्मिभिस्तात्क्षणहीयमानरथ्याभुजायावलयैरिवास्याः प्रायेण निःक्राममतिचक्रपाणौ नेष्टं पुरोद्धारवतीत्वा-
13 मासीत् ॥९॥ पौरेजलेनीरनिधेरदभ्रस्तुराशिरानीलपलाशराशिः वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कू-
लितशैवलाभाः १० लक्ष्मीभृतोम्भोधितटाधिवासात् द्रुमानसौ नीरदनीलभासः लतावधूसंप्रयुज्योधिवे-
लं बहुरूलान्स्मानिवपश्यतिस्म ११ ग्राम्यक्षिरस्मिनिरसितारमुच्चैर्लोलद्रुजाकारबृहत्तरंगैः फेनायमा-
नं पतिमापगानामसावपस्मारिणमाशशंके १२ पीत्वाजलानां निधिनातिगार्ध्यात् वृद्धिंगतेप्यात्मनि नैव-
सोतीः क्षिप्ताः द्विवेदैः सरुचो धितीरं मुक्तावलीराकलयांचकार १३ सातोपमुर्वीमनिशं नदंतोयैः प्लावयिष्य-
तिसमंततोभी तान्येकदेशान्निभृतं पयोधेः सोमासिमेघान्पिवतो ददर्श १४ उद्धृत्य मेघैस्तत एव तोयम-
र्थं मुनीन्द्रैरिव संप्रणीताः आलोकयामास हरिः पतंतीर्नदीः स्रवंतीर्वेदमिवांबुराशिं १५ किंचीयदिश्यानि-
धनानि नक्ररूपाणि दैपानसानुत्तमलाभभाजः तरीषु तत्र त्यमकं लभाडुसांयांत्रिकानावपतोम्पनंदत्
१६ उत्तिष्ठत्सवो तनंदभर्तुरुच्चैर्गिरीयसानिःश्वसितानिलेन पयोसिभक्त्या गरुडध्वजस्य ध्वजानिवोच्चि-
क्षिपिरे फणीन्द्राः १७ तमागतं वीक्ष्य युगांतबंधुमुत्संगशय्याशयमंबुराशिः प्रत्युज्जगामेव गुरुप्रमोदप्रसा १३

रिनो नु गन्तारं गबाहुः ७८ उत्सङ्गितांभःकणिको नभस्वानोदन्वतः स्वेदलवान्ममार्ज्ज तस्यानुवेलं व्र
जतोधिवेलमेलावनस्फालनलब्धगन्धः ७९ उत्तालतालीवनसंप्रवृत्तसमीरसीमन्तितकेतकी
काः आसेदिरे लावणसैन्धवीनां चमूचरैः कच्छभुवां प्रदेशाः ८० लवंगमालाकलितावतंसास्ते नालि
केरान्तरपः पिबन्तः आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमापुः ८१ तुरगशताकुलित
स्य परितः परमेकतुरंगजन्मनः प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृताः परिचलतो व
लानुजबलस्य पुरः सततं धृतश्रियश्चिरं विगतश्रियो जलनिधेश्च तदाभवदन्तरं महत् ८२ इति
श्रीशिशुपालवधे महाकाव्ये श्र्यङ्के माघकृतौ द्वारकावर्णनो नाम तृतीयः सर्गः ३ निश्वास
धूमं सह रत्नभाभिर्भित्वोत्थितं भूमिमिवोरगाणां नीलोपलस्यूतविचित्रधातुमसौ गिरिं रैवतकं द
दर्श १ गुर्वीरजस्रं दृषदः समन्तादुपर्युपर्य्यम्बुमुचां वितानैः विन्ध्यायमानं दिवसस्य भर्त्तुर्मार्गं पुन
रोद्धुमिवोन्नमद्भिः २ क्रान्तं रुचा काञ्चनवप्रभाजा नवप्रभाजालभृतां मणीनां श्रितं शिलाश्याम
लताभिरामं लताभिरामं श्रितपट्पदाद्भिः ३ सहस्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य वितिष्ठमानं वि

२५ विलोचनस्थानगतोष्णरश्मिनिशाकरं साधु हिरण्यगर्भं ४ क्वचिज्जलापायविपांडुराणि धौतोत्तरी
14 यप्रतिमच्छवीनि अभ्राणि बिभ्राणमुमांगसंगविभक्तभस्मानमिव स्मरारिं ५ छायां निजस्त्रीचटुला
लसानां मदेन किंचिच्चटुलालसानां कुर्वाणमुत्पिंजलजातपत्रैः विहंगमानां जलजातपत्रैः ६ स्कं
धाधिरूढोज्वलनीलकंठानुर्वीरुहः श्लिष्टतनूनहीन्द्रैः प्रभर्त्तिनानेकजलाभुजाग्रानरुद्रानन नंतानि
व धारयंतं ७ विलंविनीलोत्पलकर्णपूराः कपोलभित्तीरिव लोध्रगौरीः नवोलपालंकृतसैकताभाः
शुचीरपः शैवलिनी दधानं ८ राजीवराजीवशलोलभृंगं मुष्णंतमुष्णं ततिभिस्तरूणां कांतालकांताल
ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहंतं ९ मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृंगैः भवंति नोद्दा
मगिरां कवीनामुच्छ्रायसौंदर्यगुणा मृषोद्याः १० यतोमहार्घ्याणि हृतान्यनूनैः प्रस्थैर्मुहुर्भूरिभिरुच्छि
खानि आढ्यादिव प्रापणिकादजस्रं जग्राह रत्नान्यमितानि लोकः ११ अखिद्यतासन्नमुदग्रतापं रविं द
धानेप्यरविंदधाने भृंगावलिर्यस्य तटे निपीतरसा नमत्तामरसा न मत्ता १२ यत्राधिरूढेन महीरुहोच्चैरु
न्निद्रपुष्पाक्षिसहस्रभाजा सुराधिपाधिष्ठितहस्तिमल्ललीलां दधौ राजतगंडशैलः १३ विभिन्नवर्णा गरुडा २५

यजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या रत्नैः पुनः यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः १४ यत्रो-
ज्झिताभिर्मुहुरंबुवाहैः समुन्नवद्भिर्न समुन्नमद्भिः वनं बबाधे विषपावकोत्था विपन्नगानामविपन्नगा-
नां १५ फलद्भिरुस्नांशुकराभिमर्शात्कार्शानवं धाम पतंगकांतैः शशंस यः पात्रगुणाद्गुणानां संक्रांतिमा-
क्रांतगुणातिरेकां १६ दृष्टोपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान क्षणे क्षणे यन्नवतामुपैति
तदेव रूपं रमणीयतायाः १७ उच्चारणज्ञोथ गिरो दधानमुच्चारणत्पक्षिगणास्तटीस्तं उत्कंधरं द-
ष्टुमवेक्ष्य शौरिमुत्कंधरं दारुक इत्युवाच १८ आच्छादितायतदिगंबरमुच्चकैर्गामाक्रम्य संस्थितमुद-
ग्रविशालशृंगं मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेनमुद्वीक्ष्य को भुवि न विस्मयते नगेशं १९ उदय-
ति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तं वहति गिरिरयं विलंबिघंटाद्वयपरिवारितवारणें-
द्रलीलां २० वहति यः परितः कनकस्थलीः सहरितालसमाननवांशुकः अचल एष भवानिव राजते स-
हरितालसमाननवांशुकः २१ पाश्चात्समागमिह सानुषु संनिबद्धा पश्यंति शांतमलसांद्रतरांशुजाले
संसर्पिलक्ष्मललनाललवनोपमानमुत्संगसंगिहरिणस्य मृगांकमूर्तेः २२ कृत्वा पृथुं वत्स तमुच्चैर्गुम्यो-

श्री

२५ मूर्छद्भिग्रावणं जर्जरा निर्झरौघाः कुर्वंति द्यामुत्पतंतः स्मरार्तस्वर्लोकस्त्रीगात्रनिर्वाणमत्र २३ स्थगयंत्यमूः
15 शमितचातकार्तस्वरा जलदास्तडित्तुलितकांतकार्तस्वराः जगतीरिहस्फुरितचारुचामीकराः सवि
तुक्कचित्कपिशयंति चामीकराः २४ उद्दित्तमुच्छ्रितसितांशुकरावलंबैरुत्तंभितोडुभिरतीवतरां शिरो
भिः श्रद्धेयनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमंतरिक्षं २५ एकत्रस्फटिकतटां
शुभिन्ननीरा नीलाश्मद्युतिभिदुराम्भसोपरत्र कालिंदीजलजनितश्रियः श्रयंते मिह वैदग्धीमिहस
रितः सुरापगायाः २६ इतस्ततोस्मिन्विलसंति मेरोः समानवप्रे मणिसानुरागाः स्त्रियश्च पत्यौ सुरसुंदरी
भिः समानवप्रेमणि सानुरागाः २७ उच्चैर्महारजतराजिविराजितासौ दुर्वर्णभित्तिरिह सांद्रसुधासवर्णा
अभ्येति भस्मपरिपांडुरितस्मरारेरुद्वह्निलोचनललामललामलीलां २८ अयमतिजरठाः प्रकामगु
र्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति २९
धूमाकारं दधति पुरः सौवर्णे वर्णेनाग्नेः सदृशि तटे पश्यामी श्यामीभूताः कुसुमसमूहेलीनां लीनां श्रेणी
मिह तरवो बिभ्राणाः ३० व्योमस्पृशः प्रथयता कलधौतभित्तीरुन्निद्रपुष्पचणचंपकपिंगभासः सौमेर १५

वीमधिगतेन निकुंजशोभामेतेन भारनमिताहतबर्हिभाति ३१ रुचिरचित्रतनूरुहशालिभिर्विरचितैः परतः
प्रियकव्रजैः विविधरत्नमयैरविभात्यसावयवैरिव जंगमतां गतैः ३२ कुशशयैरत्र जलाशयोषिता मुदारमं
ते कलभाविकस्वरैः प्रगीयते सिद्धगणैश्च योषिता मुदारमंते कलभाविकस्वरैः ३३ आसादितस्य तमसा नि
यतेर्नियोगादाकांक्षतः पुनरुपक्रमणेन कालं पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरपरिभूतममूर्बिभ
र्ति ३४ पुनः प्रतिस्कंद्य निषण्णवाल प्रवालरक्ताः प्रमदा इवात्र पुष्पेक्षणैर्लंभितलोचकैर्वा मधुव्रतव्रातवृतै
र्व्रतत्यः ३५ विहंगमाः कदंबसुरभाः विहंगाः कलयंत्यनुक्षणमनेकलयं भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूत
नवनीपवनः ३६ विद्धिरागमपरैर्विहतं कथंचित्तश्रुत्वापि गुणमहमनाश्रितधीभिरन्यैः श्रेयान्द्विजातिरिव
हंतुमपानिदं तं गूढार्थमेकनिधिमंत्रगणं विभर्ति ३७ विंबोष्ठं बहुमनुते तुरंगवक्त्रश्चुंबंतं मुखमिह किंनरं
प्रियायाः श्लिष्यंतं मुहुरितरोपि तं निजस्त्रीमुत्तुंगस्तनभरभंगभीरुमध्यां ३८ यदेतदस्यानुतटं विभाति वनं
ततानेकतमालतालं न उच्छ्रितात्रस्थगितार्करश्मावनं ततानेकतमालतालं ३९ दंतोज्वलासु विमलोप
लमेखलांताः सद्रत्नचित्रकटकासु बृहन्नितंबाः अस्मिन्भजंति घनकोमलगंडशैलाः नार्योनुरूपमधिवासमधि

१६ त्यकासु ४० अनतिचिरोज्झितस्य जलदेन चिरस्थितबहुबुद्बुदस्य पयसोनुकृतिं विरलविकीर्णवज्रसै
16 कता मिह विदधाति धौतकलधौतमही ४१ वर्ज्ययंत्या जनैः संगमेकांततस्तर्कयंत्या सुखं संगमे कांतत
यो पयैषस्मरासन्नतापांगयासेव्यते नेकया सन्नतापांगया ४२ संकीर्णकीचकवनस्खलितैकवालः
विच्छेदकातरधियश्चलितुं चमर्यः अस्मिन्मृदुश्वसनगर्भतदीयरंध्रनिर्यत्स्वरश्रुतिसुखादिव नोत्स
हंते ४३ मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रैर्वापीष्वंतर्लीनमहानीलदलासु शस्त्रीश्यामैरंशुभि
राशु द्रुतमंभश्छायामच्छामृच्छति नीलीसलिलस्य ४४ या न ययौ प्रियमन्यवधूभ्यः सारतरागमना यत
माने तेन सदेह विभर्ति रहः स्त्री सारमरागमनायतमाने ४५ भिन्नेषु रत्नकिरणैः किरणेष्विहेंदोरुच्चाव
चैरुपगतेषु सहस्रसंख्यां दोषापि नूनमहिमांशुरसौ किलेति व्याकोशकोकनदतां दधते नलिन्यः ४६ अप
शंकमंकपरिवर्तनोचिताश्चलिताः पुरः पतिमुपैतुमात्मजाः अनुरोदितीव करुणेन पत्रिणां विरतेन वत्सल
तयैष निम्नगाः ४७ मधुकरविटपानमितास्तरूपंक्तीर्बिभ्रतोस्य विटपानमिताः परिपाकपिशंगलतारज
सा रोधश्चकास्ति कपिशंगलता ४८ प्राग्भारतः पतदिहेदमुत्यकासु शृंगाश्रितायतमहेभकराभमंभः संल १६

ष्टांते विविधरत्नकरानुविद्धमूर्द्धप्रसारितः सुराधिपचापचारु ४९ दधति च विकसद्विचित्रकल्पद्रुमकुसु
मैरभिगुंफितानिवैताः क्षणमलघुविलंबिपिच्छदाम्नः शिखरशिखाः शिखिशेखरानमुष्य ५० सवधू
काः सुखिनोऽस्मिन्ननवरतममंदरागतामरसदृशः नासेवंते रसवन्ननवरतममंदरागतामरसदृशः ५१ आ
च्छाद्य पुष्पपटमेष महांतमंतरावर्त्तिभिर्गृहकपोतशिरोधराभैः स्वांगानि धूमरुचिमागुरवीं दधानैर्धूपायती
व पटलैर्नवनीरदानां ५२ अन्योन्यव्यतिकरचारुभिर्विचित्रैरत्रस्यन्नवमणिजन्मभिर्मयूखैः विस्मेरान्गगन
सदः करोत्यमुष्मिन्नाकाशे रचितमभित्तिचित्रकर्म ५३ समीरशिशिरः शिरस्सु वसतां सतां जवनिका निकाम
सुखिनो बिभर्त्ति जनयन्नयं मुदमपामपायधवला वलाहकततीः ५४ मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्र
हाणमिह लब्धसबीजयोगाः ख्यातिं च सत्वपुरुषान्यतयाधिगम्य वांछंति तामपि समाधिभृतो निरोद्धुं ५५ म
रकतमयमेदिनीषु भानोस्तरुविटपांतरपातिनो मयूखाः अवनतशितिकंठलक्ष्मीमिह दधति स्फुरिताणु
रेणुजालाः ५६ या बिभर्त्ति कलवल्लकीगुणस्वानमानमतिकालिमालया नात्र कांतमुपगीतया तया स्वा
नमानमतिकालिमालया ५७ सायं शशांककिरणाहतचंद्रकांतनिस्यंदिनीरनिकरेण कृताभिषेकाः अर्को

सि

१७ पलोल्लसितवल्गिरङ्गिदीप्तास्तीव्रं महाव्रतमिवात्र चरंति विप्राः ५८ एकस्मिन्नधिकपयःश्रियं दहंत्याः संक्षोभं पवनभुवा
जवेन नीताः वाल्मीकेररहितरामलक्ष्मणानां सादृश्यं दधति गिरां महासरस्याः ५९ इह मुहुर्मुदितैः कलभैरवः प्रति
17 दिशं क्रियते कलभैरवः स्फुरति चानुवने चमरीचयः कनकरत्नभुवां चमरीचयः ६० त्वक्साररंध्रपरिपूरणलब्धगीतिर
स्मिन्नसौ मृदितपक्ष्मलरल्लकांगः कस्तूरिकामृगविमर्दसुगंधिरेति रागीव सक्तिमधिकां विषयेषु वायुः ६१ प्रीत्यै यूनां व्य
वहिततपनाः प्रौढध्वांतं दिनमिह जलदाः दोषामन्यं विदधति सुरतक्रीडायासश्रमशमपटवः ६२ भग्नो निवासोयमिहा
स्य पुष्पैः सदानतो येन विषाणिनागः तीव्राणि तेनोच्छ्रितिकोपितोसौ सदानतोयेन विषाणि नागः ६३ प्राजेयशीतम
चलेश्वरमीश्वरोपि सांद्रेभचर्मवसनावरणोधिशेते सर्वर्तुनिर्वृतिकरे निवसन्नुपैति न द्वंद्वदुःखमिह किंचिदकिंचनो
पि ६४ नवनगवनलेखाश्याममध्याभिराभिः स्फटिककटकभूभिर्नाटयत्येष शैलः अहिपरिकरभाजो भस्मनैरंगरा
गैरधिगतधवलिम्नः शूलपाणेरभिख्यां ६५ दधद्भिरभितस्तटौ विकचवारिजांबूनदैः विनोदितदिनक्लमाः कृतरुचश्च
जांबूनदैः निषेव्य मधु माधवाः सरसमत्र कादंबरं हरंति रतये रहः प्रियतमांगकादंबरं ६६ दर्पणनिर्मलासु पतिते
घनतिमिरमुषि ज्योतिषि रूप्यभित्तिषु पुरः प्रतिफलति मुहुर्व्रीडमसंमुखोपि रमणैर पहृतवसनाकांचनकंदरासु त
रुणीरिह नयति रविः ६७ अनुकृतशिखरौघश्रीभिरभ्यागतेसौ त्वयि सरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः द्रुतमरुदुप
धर नुन्नैरुन्नमद्भिः सहेलं हलधरपरिधानश्यामलैरंबुवाहैः ६८ इति श्रीशिशुपालवधे महाकाव्ये माघकृतौ रैवतकव
र्णनो नाम चतुर्थः सर्गः ४

१७

अश्वा आवर्त्तरूपशुभलक्षणवंतः
पयोधयस्त्वंभसोऽभमयुताः = ५
अतिप्रशस्ता रोचमानाः नाभिसमीपे आवर्त्तयि
वसंत० घातेसमुद्राः शोभमानाः = ६

गजेंद्रानुकृतविशालोन्नतशिखरं = २
अभ्युल्लसत्तः स्फुरंत्यः कदलिकाध्वजदंडा एव वनराजयो यत्र = २
परिदधुः । अपरे आकाशे अंबरवहस्तनवहादिकास्त इति = ४

॥ इत्थं गिरेः प्रियतमा इव सोऽव्यलीकाः शुश्राव सूततनयस्य तदा व्यलीकाः । रंतुं निरंतरमियेष ततो
वसाने तासां गिरो च वनराजिपटं वसानेः ।१। तं सद्विपेंद्रतुलितातुलतुंगमभ्युल्लसत्कदलिकाव
नराजिरुद्धैः । विस्तारुद्धवसुधोन्वचलं चलालं लस्मैदिधस्पति गिरेरलघुर्बलौघः ।२। भास्वत्क
रव्यतिकरोल्लसितांबरांताः सापत्रपा इव महाजनदर्शनेन । संविव्युरंबरवि+काशि चमूसमुत्थं
पृथ्वीरजः करभकंठकडारमाशाः ।३। आवर्तिनः शुभफलप्रदशुक्तियुक्ताः संपन्नदेवमणयो भृ
तरंध्रभागाः । अश्वाः प्रधुर्वसुमतीमतिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापतंतः ।४। आरस्सम
न्नमेवमत्यसस्तौ पिताग्रमे । कः पलायत जवेन कृतार्त्तनादः । अन्यः पुनर्मुहुरुदप्लुवतास्तभारम
न्योन्यतः पथि वितावि मितौ विभोष्ट्रौ ।५। आयस्तमैत्तत जनश्चटुलाग्रपादं गच्छंतमुच्छलितचाम
रचारुमश्वं । नागं पुनर्मृदुसलीलनिमीलिताक्षं सर्वः प्रियः खलु भवत्यनुरूपचेष्टः ।६। त्रस्तः सम
स्तजनहासकरः करेणोस्तावत्खरः प्रखरमुल्ललयांचकार । यावच्चलासनविलोलनितंबबिंब
विस्रस्तवस्त्रमवरोधवधूः पपात ।७। शैलोपशल्यनिपतद्रथनेमिधारानिष्पिष्टनिष्ठुरशिलातलचू
र्णगर्भाः । भूरेणवो नभसि बद्धपयोदचक्राश्चक्रीवदंगरुहधूम्ररुचो विसस्रुः ।८। उद्यत्कृशानुशक
लेषु खुराभिघाताद्भूमीसमायतशिलाफलकाचितेषु । पर्यंतवर्त्मसु विचक्रमिरे महाश्वाः शैलस्य

व्यलीकं मनसोऽप्रियं
न व्यलीका अव्यलीका
मनःप्रियाः = १

विभक्तिविनमयेनागिर
रविविशेषणनिस्फुर
त्पताकासमवनपंक्ति
। विस्ताररुद्धभूमिं । अल
घुं विस्तीर्णं । बलौघस्या
पि द्विपेंद्रे स्यादि विशेष
णं तत्रापि द्विपेंद्रैस्तुलि
ता अतुलतुंगशृंगा येन
स इत्यर्थः = ३
मांसलहरितनिमग्नप्रदेशा
: = ६
आच्छादयामासुः भागुरि
मतेनावेरकारलोपः = ६
अश्वस्य जवेनैव यानमुष्वि
तं हस्तिनस्तु मंथरमित्य
र्थः = ५
उत्टीकृत उत्प्लु
तः = ७
खराकृत अंतःपुरचेटि
का = ३
शैलसमीपे गच्छंतीभिः र
थनेमिधाराभिः पिष्टानां
कठोरशिलातलानां चू
र्णगर्भे येषां ते = ३

विगतमलीकमनृ
तं त्वं या अपस्ताः सत्या
इत्यर्थः = १

शृंग २

यस्याः किल महिलायाः
भास्वता कटकादिना
सद्युतिना करेण हस्तेन
संपर्कात्स्रस्तउत्तरी
यांतो भवति सा गुरुज
नावलोकनात्सव्रीडास
ती वासः संव्येतीत्यर्थः = ३
अनुद्घटितकंठावर्त्ताः = ५
आरस्तः कुंभयोरघ इति
वैजयंती कुंभाधोभागे बु
डितं स्वलितमंकुशं = ६

चलमस्थिरं यदासनं प
र्याणवंधस्तेनाविलोलमा
कुलं यन्नितंबबिंबं ततो
विस्रस्तं पतितं वस्त्रमु
त्तरीयं यत्र क्रियायां = ४
चक्रीवान्रासभः खर
इत्यमरः = २

चंचद्ग्रेण गरुडचंचुभ्रांतेन दृष्टः खंडितात एव चंचलो योहिः सर्प एव पताका यस्यां तया =६

निद्राविमनस्कतारो वा ख्यातिस्तः कशावस्थाः कशात्रयं तद्विचारज्ञेन गच्छतो श्वस्य यदा निद्रा तदा मुखे हन्यते वैमनस्के पार्श्वे ताडनं रोषे पश्चा ताडनम् =१

गतिविशेषं =२

दर्दुरपुटानि विवादयंतः । ९ । तेजो निरोधसमतावहितेन यंत्रा सम्यक्कशात्रयविचारविदा नियुक्तैः । आ
रट्टजश्चटुलनिष्ठुरपातमुच्चैश्चित्रं चकार पदमर्द्धपुलायितेन । १० । नीहारजालमलिनः पुनरुक्तसां
द्राः कुर्वन्व धूजननविलोचनपक्ष्ममालाः । तुल्यः स्थलं यदुवलैर्दिवमातितांसुः पांशुर्दिशां मुखमतुत्थय
दुत्थितोद्रेः । ११ । उच्चिघ्यविद्विषइवप्रसभं मृगेंद्रानिद्रानुजानुचरभूपतयोध्यवात्सुः । वन्येभमस्तकनि
खातनखाग्रमुक्तमुक्ताफलप्रकरभांजि गुहागृहाणि । १२ । विभ्राणया बहुलयावकपंकपिंगपिंछावचूलमनुमाधवधाम जग्मुः । चंचद्ग्रदष्टचटुलाहिपताकया न्येस्वावासभागमुरगाशनकेतयष्टी । १३ ।
। छायामपास्य महतीमपि वर्त्तमानामागामिनीं जगृहिरे जनतास्तरूणां । सर्वो हि नोपगतमप्यपचीयमानं वर्द्धिष्णुमाश्रयमनागतमभ्युपैति । १४ । आगेगतेन वसतिं परिगृह्य रम्यामापात्य सैनिकान्निराकरणाकुलेन । यांतोन्यतः प्लुतकृतस्वरमाशु दूरादुद्वाहुना जुहुविरे मुहुरात्मवर्ग्याः । १५ ।
